श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे

# ॥ द्वादशाधिकशततमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ द्वादशाधिकशततमः सर्गः ॥

## विभीषणस्य राज्याभिषेकः श्रीरामेण हनुमद्द्वारा सीतां प्रति सन्देशस्य प्रेषणम्

ते रावणवधं दृष्ट्वा देवगन्धर्वदानवाः।
जग्मुः स्वैः स्वैर्विमानैस्ते कथयन्तः शुभाः कथाः ॥ **6.112.1** ॥

रावणस्य वधं घोरं राघवस्य पराक्रमम्।
सुयुद्धं वानराणां च सुग्रीवस्य च मन्त्रितम् ॥ **6.112.2** ॥

अनुरागं च वीर्यं च मारुतेर्लक्ष्मणस्य च।
पतिव्रतात्वं सीताया हनूमति पराक्रमम् ॥ **6.112.3** ॥

कथयन्तो महाभागा जग्मुर्हृष्टा यथागतम्।
राघवस्तु रथं दिव्यमिन्द्रदत्तं शिखिप्रभम् ॥ **6.112.4** ॥

अनुज्ञाप्य महाबाहुर्मातलिं प्रत्यपूजयत्।
राघवेणाभ्यनुज्ञातो मातलिः शक्रसारथिः ॥ **6.112.5** ॥

दिव्यं तं रथमास्थाय दिवमेवोत्पपात ह।
तस्मिंस्तु दिवमारूढे सरथे रथिनां वरः ॥ **6.112.6** ॥

राघवः परमप्रीतः सुग्रीवं परिषस्वजे।
परिष्वज्य च सुग्रीवं लक्ष्मणेनाभिवादितः ॥ **6.112.7** ॥

पूज्यमानो हरिगणैराजगाम बलालयम्।
अथोवाच स काकुत्स्थः समीपपरिवर्तिनम्॥ **6.112.8** ॥

सौमित्रिं सत्त्वसम्पन्नं लक्ष्मणं दीप्ततेजसम्।
विभीषणमिमं सौम्य लङ्कायामभिषेचय॥ **6.112.9** ॥

अनुरक्तं च भक्तं च तथा पूर्वोपकारिणम्।
एष मे परमः कामो यदिमं रावणानुजम्॥ **6.112.10** ॥

लङ्कायां सौम्य पश्येयमभिषिक्तं विभीषणम्।
एवमुक्तस्तु सौमित्री राघवेण महात्मना॥ **6.112.11** ॥

तथेत्युक्त्वा सुसंहृष्टः सौवर्णं घटमाददे।
तं घटं वानरेन्द्राणां हस्ते दत्त्वा मनोजवान्॥ **6.112.12** ॥

व्यादिदेश महासत्त्वान् समुद्रसलिलं तदा।
अतिशीघ्रं ततो गत्वा वानरास्ते मनोजवाः॥ **6.112.13** ॥

आगतास्तु जलं गृह्य समुद्राद् वानरोत्तमाः।
ततस्त्वेकं घटं गृह्य संस्थाप्य परमासने॥ **6.112.14** ॥

घटेन तेन सौमित्रिरभ्यषिञ्चद् विभीषणम्।
लङ्कायां रक्षसां मध्ये राजानं रामशासनात्॥ **6.112.15** ॥

विधिना मन्त्रदृष्टेन सुहृद्गणसमावृतम्।
अभ्यषिञ्चस्तदा सर्वे राक्षसा वानरास्तथा॥ **6.112.16** ॥

प्रहर्षमतुलं गत्वा तुष्टुवू राममेव हि।
तस्यामात्या जहृषिरे भक्ता ये चास्य राक्षसाः॥ **6.112.17** ॥

दृष्ट्वाभिषिक्तं लङ्कायां राक्षसेन्द्रं विभीषणम्।
राघवः परमां प्रीतिं जगाम सहलक्ष्मणः॥ **6.112.18** ॥

स तद् राज्यं महत् प्राप्य रामदत्तं विभीषणः।
सान्त्वयित्वा प्रकृतयस्ततो राममुपागमत्॥ **6.112.19** ॥

दध्यक्षतान् मोदकांश्च लाजाः सुमनसस्तथा।
आजह्रुरथ संहृष्टाः पौरास्तस्मै निशाचराः॥ **6.112.20** ॥

स तान् गृहीत्वा दुर्धर्षो राघवाय न्यवेदयत्।
मङ्गल्यं मङ्गलं सर्वं लक्ष्मणाय च वीर्यवान्॥ **6.112.21** ॥

कृतकार्यं समृद्धार्थं दृष्ट्वा रामो विभीषणम्।
प्रतिजग्राह तत् सर्वं तस्यैव प्रतिकाम्यया॥ **6.112.22** ॥

ततः शैलोपमं वीरं प्राञ्जलिं प्रणतं स्थितम्।
उवाचेदं वचो रामो हनूमन्तं प्लवङ्गमम्॥ **6.112.23** ॥

अनुज्ञाप्य महाराजमिमं सौम्य विभीषणम्।
प्रविश्य नगरीं लङ्कां कौशलं ब्रूहि मैथिलीम्॥ **6.112.24** ॥

वैदेह्यै मां च कुशलं सुग्रीवं च सलक्ष्मणम्।
आचक्ष्व वदतां श्रेष्ठ रावणं च हतं रणे॥ **6.112.25** ॥

प्रियमेतदिहाख्याहि वैदेह्यास्त्वं हरीश्वर।
प्रतिगृह्य तु सन्देशमुपावर्तितुमर्हसि॥ **6.112.26** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे
द्वादशाधिकशततमः सर्गः॥